**International Journal of Research in Social Sciences**
Vol. 7 Issue 7, July 2017,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# बौद्धार्थः

डॉ. कैलासचन्द्रदाशः

सहायकाचार्यः

दृश्यते अधिक्रियते सञ्ज्ञायते आत्मानात्म-जीवब्रह्म-प्रकृतिपुरुषजगद्धर्ममोक्ष-विषयकविचारः अनेनेति दर्शनम्। एवञ्च दर्शनं नाम किञ्चित्परतत्त्वप्रतिपादकं शास्त्रमिति वक्तुं शक्यते। विचारवैभिन्यात् वैशिष्ट्यविशिष्टत्वाच्च यथा अन्यानि दर्शनानि स्वीयविचारतत्त्वानि बहुविधानि भवन्ति, तथैव व्याकरणदर्शनमपि दर्शनान्तरवद् नूतनविचारविचारितत्वात् अन्येभ्यो व्यतिरिक्तं सत् राजते। तेषु नूतनविचारेषु वैयाकरणानां बौद्धार्थविचारः अन्यतमः।

बुद्धौ भवः बौद्धः, स चासावर्थश्च बौद्धार्थः। तेषु विचारः इति बौद्धार्थविचारः। बुद्धौ भवानाम् अर्थानां विषये विचारे कृते बुद्धौ अर्थानां सत्ता अभ्युपेया न वेति। सा च सत्ता किं प्रकारिका चेति।

वैयाकरणानां नये अर्थाभिव्यञ्जकः स्फोटः आन्तरः बाह्यश्चेति भेदेन द्विविधः, आन्तरस्फोटः आन्तरप्रणवरूपः। ओङ्कारः एव सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति इति श्रुतिवचनात्। भाष्यमतेऽपि स्फोटत्वं निगदितमस्ति। तथा **वागेव विश्वा भुवनानि यज्ञे** इत्यादि श्रुतेः निरञ्जननिर्विकारद्वैतब्रह्मपदभाक् स एवान्तरस्फोटः। इत्थमान्तरस्यैव स्फोटस्य वाचकत्वं सुतरां सिद्ध्यति। बाह्यस्फोटस्तु वर्णपदवाक्येषु जाति व्यक्तिभेदेन भिद्यते इव वर्तते। तत्र यथा वाचकः शब्दस्फोटो निर्विभागः आन्तरः तथा वाच्यः अर्थोऽपि निर्विभागः आन्तर एव। इत्थमियं बौद्धार्थकल्पना गरीयसी प्रतिभाति। एवं पदं पदार्थश्चैतद्द्वयं बुद्धावेव तिष्ठतः। गोचरीभूयमानानि सर्वाण्यपि वस्तूनि सूक्ष्मरूपेण तत्रैव निवसन्तीति तात्पर्यम्।

इदानीं शङ्का जायते यत् सर्वे शब्दाः तत्र अर्थाश्च बौद्धाश्चेत् तर्हि शशशृङ्गादिवद् अलीकानां समेषाम् अपि शब्दानां प्रामाण्यं स्यादिति किल? चेन्मैवम्, संवादिनीविसंवादिनीभेदेन प्रवृत्तिभेदस्वीकारात् । यदा बाह्यार्थेन विसंवादिनी प्रवृत्तिः, अर्थात् तस्यार्थस्य बहिरभावश्चेत् तर्हि अप्रामाण्यम्। खपुष्पाद्यलीकपदानाम् अप्रामाण्येऽपि शाब्दबोधस्तु जायत एव। अत एव उक्तं परमलघुमञ्जूषाकारेण यत् –

**International Journal of Research in Social Sciences**
Vol. 7 Issue 7, July 2017,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

**एष वन्ध्यासुतो याति खपुष्पकृतशेखरः।**
**कूर्मक्षीरचये स्नातः शशशृङ्गधनुर्धरः।।**[1] **इति।**

एतच्च बौद्धार्थाङ्गीकारे एव सङ्घटते। अन्यथा शशशृङ्गादीनां सर्वथाभावात् कस्यार्थस्य बोधः स्यादिति।

अत्र नैयायिकाः ब्रुवते यत् ज्ञानलक्षणाप्रत्यासत्त्या स्मृत्या शशशृङ्गमित्यादिपदानां शाब्दबोधः सुकरः। ज्ञानलक्षणा च चक्षुर्जन्यज्ञाने विषयतासम्पादकसंस्कारजनकज्ञानविषयत्वम्। तद्यथा चक्षुर्जन्यज्ञाने चाक्षुषप्रत्यये वा विषयता शशशृङ्गनिष्ठा, तस्या विषयतायाः सम्पादको यः संस्कारः शशशृङ्गं दृश्यते इत्याकारकः, तस्य जनकं यच्छशशृङ्गस्य ज्ञानं, तस्य विषयत्वं शशशृङ्गपदेऽस्त्येवेति। इतरे च शृङ्गे शशीयत्वभ्रमः इत्यभ्युपयन्ति, एतत् पक्षद्वयमपि न समीचीनम्। अनुभवविरुद्धस्य ज्ञानलक्षणा-प्रत्यासत्ति-जनस्यस्य तथाविधस्मरणस्य अप्रामाण्यात्। तस्याश्च अभावात्। सा च भूतकालिका अनुभवाख्यज्ञानविषयता "सोऽयं देवदत्तः" इत्याकारिका। शशशृङ्गं दृश्यते इत्याकारकस्य संस्कारस्य शशशृङ्गपदेन ज्ञानं कथमपि न सम्भवेत्। न ह्यत्र रज्जौ सर्पवद् भ्रमोऽपि। तत्र तु रज्जुः सर्पश्चेति द्वावपि बाह्ये तिष्ठतः। परमत्र शशशृङ्गस्य सर्वथा बहिरभावश्चेति भिन्नः विषयः सः।

येऽर्थाः अदृष्टार्थाः सन्ति, अर्थात् बहिर्नावलोक्यन्ते ये तेऽपि बुद्धिदेशे सन्ति। यथा दिलीपनामको राजा आसीत्। इतीदानीं दिलीपपदबोधस्यार्थस्य बहिरभावेऽपि बुद्धौ सामान्यरूपेण प्रतिभाति। तस्य च दिलीपस्य कीदृशाः अवयवाः आसन्, किञ्च दिलीपगतवैशिष्ट्यमिति विशेषज्ञानं नास्ति, परं सामान्यज्ञानं तु अङ्गीकरणीयमेव।

बौद्धार्थस्य अभ्युपगमे तु सामान्यज्ञानमिदं कथं तावत् उपपद्येत। सामान्यज्ञानमिदं नाभ्युपगच्छेच्चेत् तर्हि दिलीपः इति पदस्य वैयर्थ्येन अर्थवत्त्वाभावात् प्रातिपदिकसञ्ज्ञायाः अभावेन विभक्त्युपत्तिर्न स्यात्। एतदेवाभिप्रेत्य उक्तं परमलघुमञ्जूषाकारेण यत् - '**अन्यथाऽर्थवत्त्वाभावेन प्रातिपदिकात्वाभावात् स्वाद्युत्पत्तिर्न स्यादिति**'[2]।

यत्तु शशशृङ्गादिषु स्थलेषु शृङ्गादिषु शशीयत्वादिभ्रमः इत्युक्तः तार्किकैः। परं मतमिदन्न समीचीनम्। शशशब्दवाच्यजन्तुदर्शनरूपबाधे सति '**शशशृङ्गं नास्तीति**'[3] वाक्ये 'शशशृङ्गम्' इत्यस्य अर्थवत्त्वानङ्गीकारे सति '**अर्थवदधातुरप्रत्ययः प्रातिपदिकम्**'[4] इति सूत्रकृतार्थवत्त्वस्य अनुक्तौ '**स्वौजसमौट्.....**'[5] इत्यादिना स्वादयः न स्युरिति।

---

[1] प.ल. मञ्जूषा, पृष्ठ - 29
[2] प.ल. मञ्जूषा, पृष्ठ - 29
[3] प.ल. मञ्जूषा, पृष्ठ - 38
[4] पा.सू. 12-45
[5] पू. सू. 4-1-2

**International Journal of Research in Social Sciences**
Vol. 7 Issue 7, July 2017,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell’s Directories of Publishing Opportunities, U.S.A

येऽर्थाः दृष्टार्थाः बाह्यसत्तासम्पन्नाः बहिरवलोक्यमानाः सन्ति, ते तु सामान्यविशेषोभयरूपेण बुद्धौ सन्तिष्ठन्ते। तेषां सामान्यज्ञानं विशेषज्ञानञ्च अस्तीति तात्पर्यम्।

‘**तदस्यास्त्यस्मिन्निति मतुप्**’[6] इति मतुब्विधायकसूत्रस्थभाष्यमपि अस्मिन् विषये प्रमाणम्। तत्र हि - ‘**न सत्तां पदार्थः व्यभिचरति**’[7] इत्युक्तम्।

न सत्तां पदार्थो व्यभिचरतीति भाष्यप्रतीकमादाय प्रदीपकारेण विस्तरेण चर्चितम्। तथा हि - "यावत् बुद्ध्या पदार्थो न विषयीकृतस्तावत्पदस्य प्रयोगाभावः। तस्माद्बुद्धिसत्तासमाविष्टोऽर्थो विधिनिषेधजननादिभिः सम्बध्यते - वृक्षोऽस्ति वृक्षो नास्ति, वृक्षो जायत इति। अत्यन्तासतोऽपि बहिः शशविषणादीनर्थान् बुद्ध्या विषयीकृत्य शशविषाणादिप्रयोगः, तस्माद् बुद्ध्यारूढोपचरिता सत्ता शब्दप्रयोगाश्रयत्वाद-व्यभिचारेत्यर्थः सैव तु बुद्धिसत्ता प्रयोक्तॄणां बहीरूपतयाऽवभासते इति।"[8] तत्रैव "बुद्ध्यारूढोपचरिताम् इति प्रदीपकारप्रतीकमाधृत्य विषमस्थलटिप्पणीकारेण भार्गवशास्त्रिणोक्तम् - बुद्ध्यारूढेषु = बौद्धपदार्थेषु उपचरिता इत्यर्थः"[9] इति। एवञ्च पदार्थः सर्वदा विद्यमानत्वेन प्रतीयते इत्यर्थः। ‘घटः’ इति कथनमात्रेण सत्तायाः अस्ति इति क्रियायाः प्रतीतौ पुनः घटोऽस्ति इत्यत्र अस्ति क्रियायाः प्रयोगो भाष्यविरुद्धत्वेन व्यर्थः। यद्यप्यत्र ‘द्विर्बद्धं सुबद्धम्’ इति न्यायेन सत्तादार्ढ्यं प्रतीयतेऽस्तीति क्रियायाः कथञ्चित् सार्थकता भवेन्नाम परं ‘घटो नास्ति’ इत्यत्र नास्तीत्यस्य पदार्थसत्तानिषेधस्य प्रयोगस्तु कथमपि कर्तुं न शक्येत। यतोहि उपरिष्टाद्भाष्यदत्र घट इत्यनेनैव घट-सत्ता प्रतीयते। इयं खलु सत्ता प्रवाहनित्यतया नित्या। एवन्तर्हि नास्तीतिपदेन नित्यायास्तस्याः सत्तायाः अभावः कथं विधास्येत। प्रवाहनित्यता च प्रवाहस्योत्पत्तिं विनाशरूपसृष्टेरनाद्यन्तत्वात् स्वीक्रियते। ‘नित्या वर्णा नित्या वेदा इति च सम्प्रदाया विच्छेदात्, नित्या पृथिवी, नित्याः पर्वताः इतिवत्’ इत्येवमनुमीयमाना न्यायवार्तिककृतापि प्रवाहनित्यता अभ्युपगता। इत्येवं रीत्या बौद्धार्थानङ्गीकर्तॄणां मते अत्र नास्तीति पदस्य वैयर्थ्यं स्पष्टमेव। बौद्धार्थाङ्गीकर्तॄणां वैयाकरणानां मते तु सत्ता द्विविधा-बौद्धसत्ता, बाह्यसत्ता च। तत्र बुद्धौ पदार्थानां सदैव विद्यमानत्वेन बौद्धी सत्ता सार्वकालिकी, बाह्यसत्ता च व्यावहारिकी प्रवृत्तिप्रयोजिका इति बोध्यम्। एवञ्च बाह्यसत्ताबोधनार्थमस्तीतिपदस्य प्रयोगस्तद्राहित्यबोधनार्थञ्च नास्तीति पदस्य प्रयोगः साधु संघटते।

---

[6] पा. सू. 5-2-94
[7] म. भा. 5-2-94, पृ.सं. -341
[8] म.भा. प्रदीप – 5-2-94, पृ.सं. - 341
[9] म. भा. 5-2-94 विषयस्थल टिप्पणी, पृ.सं.- 341

International Journal of Research in Social Sciences
Vol. 7 Issue 7, July 2017,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

**'हेतुमति च'**[10] इति सूत्रे तत्रस्थभाष्यकैयटादिग्रन्थेऽपि अयं बौद्धपदार्थः समर्थितः। **'हेतुमति च'** इत्यत्र "प्रत्यक्षं कंसं घातयति"[11] इत्यत्र णिजुपपादनावसरे कंसादीनाम् ऋद्धिं व्याचक्षाणाः कथकाः चिरकालातीतानां बहिरविद्यमानत्वेऽपि बुद्धिगोचरतया विद्यमानान् कंसादीन् प्रकाशयन्तीति कथितम्। तथा च नटैः श्रोतरि कंसाद्याकारकज्ञानोत्पादनात् बौद्धवासुदेवेन कंसं प्रकाशयन्तीति गदितम्। तथा च नटैः श्रोतरि कंसाद्याकारज्ञानोत्पादनाद् बौद्धवासुदेवेन कृष्णेन कंसं घातयति इत्यादि प्रयोजकत्वोपपत्तिः। इत्थञ्च तत्र भाष्ये बौद्धार्थेन वर्तमानत्वं स्वीकृत्य वार्तिकं प्रत्याख्यातम्।

**"परः सन्निकर्षः संहिता"**[12] इति सूत्रे भगवतः पाणिनेरपि आन्तरस्यैवाखण्डस्फोटस्य वाचकत्वामान्तरस्यैव बौद्धार्थस्य वाच्यत्वमित्यभिप्रायः। अन्यथा उत्पादविनाशशालिनां त्रिक्षणावस्थायिनां वर्णानां सन्निकर्षो दुरुपद्येत स्वीकृते तु बौद्धपदार्थे बुद्धिदेशे सन्निकर्षः पौर्वापर्यं च साधु सम्भवेत्। अत एव प्रकृतसूत्रभाष्ये उक्तम् –

**बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरस्तत्वन्नीतिः।**
**शब्देनार्थान्वाच्यान् दृष्ट्वा बुद्धौ कुर्यात् पौर्वापर्यम्।।**[13]

भर्तृहरिरपि वाक्यपदीये बौद्धार्थं न्यरूपयत्। तथा हि –

**शब्दोपहितरूपांश्च बुद्धेर्विषयतां गतान्।**
**प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते।।**[14]
**बुद्धिप्रवृत्तिरूपञ्च समारोप्याभिधातृभिः।**
**अर्थेषु शक्तिभेदानां क्रियते परिकल्पना।।**[15] **इति।**

दर्शान्तरेष्वपि प्रकारान्तरेण बौद्धार्थमङ्गीकृतवन्तः। यथा वेदान्ते **'जन्माद्यस्य यतः'** इति सूत्रविवेचनकाले मिश्रवाचस्पतिना उक्तम्- "चेतनो हि कुम्भकारो नामरूपे बुद्धावालिख्य 'घट' इति नाम्ना कम्बुग्रीवादिरूपेण च बाह्यघटं

[10] पा. सू. 3-1-26
[11] म.भा. 3-1-26, पृ.सं.- 69
[12] पा. सू. 1-4-108
[13] म. भा. 1-4-108, पृ.सं. - 309
[14] वा. प. 3-7-5
[15] वा. प. 3-7-6

**International Journal of Research in Social Sciences**
Vol. 7 Issue 7, July 2017,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

निष्पादयति"[16] इत्यादिना बौद्धार्थः सुस्पष्ट एव। इत्थमेव न्यायनयेऽपि न्यायदर्शनकारैः गौतमपादैरपि **'बुद्धिसिद्धन्तु तदसत्'**[17] इति सूत्रे बौद्धार्थः अभिहितः। बुद्धिविषयतया सिद्धं तत् असज्जगदुत्पद्यते इति सूत्रस्य भावः।

महावैयाकरणः श्रीमद्भट्टोजिदीक्षितोऽपि बौद्धार्थं स्पष्टयति सिद्धान्तकौमुद्याः आरम्भे मङ्गलपद्यकथनकाले –

**मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च।**
**वैयाकरणसिद्धान्तकौमुदीयं विरच्यते।**[18] इति

तत्र 'कौमुदीयं विरच्यते' इति निगदितम्। यदि बौद्धः नाङ्गीक्रियते तर्हि –

**इदमस्तु सन्निकृष्टे समीपवर्ति चैतदो रूपम्।**
**अदसस्तु विप्रकृष्टे, तदिति परोक्षे विजानीयात्।।**

इति नियमेन विवक्षितायाः कौमुद्याः बाह्ये अभावात् **इयम्** इति प्रयोगः अनुपपन्नः स्यात्।

वेदव्यासेनोक्तम् –

**विप्र ! पृथ्व्यादिचित्रस्थं न बहिष्ठं कदाचन**
**स्वप्नभ्रममदाद्येषु सर्वैरेवानुभूयते।। इति।**

इत्थं बौद्धार्थस्य सत्ता परमावश्यकीति विचारः लघुरूपेणोपस्थापितः। बौद्धार्थं विना श्रुतिस्मृतिदर्शनपुराणानां समस्तविद्यानां तार्किकदार्शनिकशाब्दिकादिविदुषां वचनविरोधः आपतेत्। अतः निस्सन्देहम् अभिधातुं शक्नुमो वयं यत् बौद्धार्थकल्पना शास्त्रसहायिका व्यावहारिके दैनन्दिने जीवनेऽपि अस्माकं बहुपयोगिनीति।।

[16] भामती- 1-1-2, पृ.सं. - 65
[17] गौतम न्याय. सू. – 4-1-50
[18] सिद्धान्तकौमुदी, भा.प्र.भा., पृ.सं.- 1